। स्युस्ते । त एकविꣳशतिरात्रं । एकविꣳशतिरात्रमासीरन् । एकविꣳशतिरात्रमित्येकविꣳशति-रात्रं । आसीरन्द्वादशं । द्वादशमासाँः । मासाः पंच । पंचर्तवः । ऋतवस्त्रयः । त्रय इमे । इमे लोकाः । लोका असौ । असावादित्यः । आदित्य एकविꣳशः । एकविꣳश एतावन्तः । एकविꣳश इत्येक-विꣳशः । एतावन्तो वै । वै देवलोकाः । देवलोकास्तेषुं । देवलोका इतिं देव-लोकाः । तेष्वेव । एव यथापूर्वं । यथापूर्वं प्रतिं । यथापूर्व-मितिं यथा-पूर्वं । प्रतिं तिष्ठन्ति । तिष्ठन्त्यसौ । असावादित्यः । आदित्यो न । न वि । व्यरोचत । अरोचत सः । स प्रजापतिं । प्रजापतिमुपं । प्रजापतिमितिं प्रजा-पतिम् । उपाधावत् । अधावत्तस्मैं । तस्मा एतम् । एतमेकविꣳशति रात्रं । एकविꣳशतिरात्रं प्र । एकविꣳशतिरात्रमित्येकविꣳशति-रात्रं । प्रायच्छत् । अयच्छत्तं । त मा । आहरत् । अहरत्तेन । तेनायजत । अयजत ततः । ततो वै । वै सः । सोऽरोचत । अरोचत ये । य एवं । एवं विद्वाꣳसः । विद्वाꣳस एकविꣳशतिरात्रं । एकविꣳशतिरात्रमासते । एकविꣳशतिरात्रमित्येक विꣳशति-रात्रम् । आसते रोचन्ते । रोचन्त एव । एवैकविꣳशतिरात्रः । एकविꣳशतिरात्रो भवति । एकविꣳशरात्र इत्येक विꣳशति-रात्रः । भवति रुक् । रुग्वै । वा एकविꣳशः । एकविꣳशो रुचँ । एकविꣳश इत्येक-विꣳशः । रुचमेव । एव गच्छन्ति । गच्छन्त्यर्थौं । अर्थौं प्रतिष्ठां । अथो इत्यर्थौं । प्रतिष्ठामेव । प्रतिष्ठामितिं प्रति-स्थाम् । एव प्रतिष्ठा । प्रतिष्ठा हि । प्रतिष्ठेतिं प्रति-स्था । ह्येकविꣳशः । एकविꣳशोऽतिरात्रो ।

एकविꣳश इत्येक-विꣳशः । अतिरात्रावभितः । अतिरात्रावित्यति-रात्रो । अभितो भवतः । भवतो ब्रह्म-वर्चसस्य । ब्रह्मवर्चसस्य परिगृहीत्ये । ब्रह्मवर्चसस्येति ब्रह्म-वर्चसस्य । परिगृहीत्या इति परि-गृहीत्ये () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -11, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

अर्वाङ्याज्ञः । यज्ञस्सं । सं क्रामतु । क्रामब्बमुष्मात् । अमुष्मादधि । अधि माम् । मामभि । अभीत्यभि ॥ ऋषीणां यः । यः पुरोहितः । पुरोहित इति पुरः-हितः ॥ निर्देवं निर्वीरं । निर्देवमिति निः-देवम् । निर्वीरं कृब्बा । निर्वीरमिति निः-वीरम् । कृब्बा विष्कधम् । विष्कधं तस्मिन्न् । विष्कधमिति वि-स्कधम् । तस्मिन्, हीयतां । हीयतां यः । योऽस्मान् । अस्मान्द्वेष्टि । द्वेष्टीति द्वेष्टि ॥ शरीरं यज्ञशमलं । यज्ञशमलं कुसीदं । यज्ञशमलमिति यज्ञ-शमलम् । कुसीदं तस्मिन्न् । तस्मिꣳन्थ्सीदतु । सीदतु यः । योऽस्मान् । अस्मान्द्वेष्टिः । द्वेष्टीति द्वेष्टि ॥ यज्ञं यज्ञस्य । यज्ञस्य यत् । यत्तेजः । तेजस्तेन । तेन सं । सं क्राम । क्राम मा । मा मभि । अभीत्यभि ॥ ब्राह्मणानृब्बिजः । ऋब्बिजो देवान् । देवान्, यज्ञस्य । यज्ञस्य तपसा । तपसा ते । ते सव । सवाहम् । अहमा । आ हुवे । हुव इति हुवे ॥ इष्टेन पक्व । पक्वमुप । उप ते ()

काण्ड -7, प्रपाठक -3, अनुवाक -11, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। ते हुवे । हुवे सव । सवाहम् । अहमित्यहम् ॥ सं तै । ते वृजे । वृजे सुकृतं । सुकृतꣳ सं । सुकृतमिति सु-कृतम् । सं प्रजां । प्रजां पशून् । प्रजामिति प्र-जाम् । पशूनिति पशून् ॥ प्रेषान्थ्सामि-धेनीः । प्रेषानिति प्र-एषान् । सामिधेनीरागारो । सामिधेनिरिति सां-इधेनीः । आघारावाज्यभागो । आघारावित्याघारो । आज्यभागावाश्रुतं । आज्यभागावित्याज्य-भागो । आश्रुतं प्रत्याश्रुतं । आश्रुतमित्या-श्रुतम् । प्रत्याश्रुत मा । प्रत्याश्रुत-मिति प्रति-आश्रुतम् ।

आ शृ॑णामि । शृ॒णामि॒ ते । त इति॑ ते ॥ प्रयाजानू- याजान्थ्स्विष्टकृ॑तँ । प्रयाजानूयाजानिति॑ प्रयाज-अनूयाजान् । स्विष्टकृतमिडा॑ँ । स्विष्टकृतमिति॑ स्विष्ट-कृत॑ँ । इडा॑मा॒शिषः॑ । आ॒शिष॒ आ । आ॒शिष॒ इत्या॑-शिषः॑ । आ वृ॑ञ्जे । वृ॒ञ्जे॒ सुवः॑ । सुवरिति॒ सुवः॑ ॥ अग्निनेंद्रे॑ण । इ॒न्द्रे॑ण सोमे॑न । सोमे॑न सर॑स्वत्या । सर॑स्वत्या विष्णु॑ना । विष्णु॑ना दे॒वता॑भिः । दे॒वता॑भिरिति॑ दे॒वता॑भिः ॥ याज्यानुवाक्या॑भ्यामुप॑ । याज्यानुवाक्या॑भ्यामिति॑ याज्या-अनुवाक्या॑भ्याम् । उप॑ ते । ते हुवे । हुवे सव । सवाहं । अहं यज्ञं । यज्ञमा । आ द॑दे । द॒दे॒ ते । ते वष॑ट्कृतम् । वष॑ट्कृतमिति॒ वष॑ट्-कृतम् ॥ स्तुत॑ꣳ शस्त्रं । शस्त्रं प्र॑तिग॒रं । प्र॒ति॒ग॒रं ग्रह॑ँ । प्र॒ति॒ग॒रमिति॑ प्रति- ग॒रं । ग्रह॒मिडा॑ँ । इडा॑मा॒शिषः॑ । आ॒शिष॒ आ । आ॒शिष॒ इत्या॑-शिषः॑ ()

काण्ड -7, प्रपाठक -3, अनुवाक -11, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। आ वृ॑ञ्जे । वृ॒ञ्जे॒ सुवः॑ । सुवरिति॒ सुवः॑ ॥ पत्नीसंयाजानुप॑ । पत्नीसंयाजानिति॑ पत्नी-संयाजान् । उप॑ ते । ते हुवे । हुवे सव । सवाहम् । अहꣳ स॑मिष्ट-यजुः । स॒मि॒ष्ट॒यजुरा । स॒मि॒ष्ट॒यजुरिति॑ समिष्ट-यजुः । आ द॑दे । द॒दे॒ तव॑ । तवेति॒ तव॑ ॥ पशून्थ्सुतं । सुतं पु॑रोडाशान् । पु॒रो॒डा॒शा॒न्त्सव॑नानि । सवा॑नान्या । ओत । उत यज्ञं । यज्ञमिति॑ यज्ञं ॥ देवान्थ्सेन्द्रान् । सेंद्रा- नुप॑ । सेंद्रानिति॒ स-इ॒न्द्रान् । उप॑ ते । ते हुवे । हुवे सव । सवाहं । अहमग्निमु॑खान् । अग्निमु॑खान्थ्सोम॑वतः । अग्निमु॑खानित्यग्नि-मुखान् । सोम॑वतो ये । सोम॑वत इति॒ सोम-वतः॑ । ये च॑ । च॒ विश्वे॑ । विश्व॒ इति॒ विश्वे॑ () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -12, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

भूतं भव्यँ । भव्यं भविष्यत् । भविष्यद्वषट् । वषट्थ्स्वाहाँ । स्वाहा नमः । नम ऋक् । ऋक्सामं । साम यजुः । यजुर्वषट् । वषट्थ्स्वाहाँ । स्वाहा नमः । नमो गायत्री । गायत्री त्रिष्टुप् । त्रिष्टुब्जगती । जगती वषट् । वषट्थ्स्वाहाँ । स्वाहा नमः । नमः पृथिवी । पृथिव्यन्तरिक्षं । अन्तरिक्षं द्यौः । द्यौर्वषट् । वषट्थ्स्वाहाँ । स्वाहा नमः । नमोऽग्निः । अग्निर्वायुः । वायुस्सूर्यः । सूर्यो वषट् । वषट्थ्स्वाहाँ । स्वाहा नमः । नमः प्राणः । प्राणो व्यानः । प्राण इति प्र-अनः । व्यानोऽपानः । व्यान इति व्या-अनः । अपानो वषट् । अपान इत्यप-अनः । वषट्थ्स्वाहाँ । स्वाहा नमः । नमोऽन्नँ । अन्नं कृषि । कृषिर्वृष्टिः । वृष्टिर्वषट् । वषट्थ्स्वाहाँ । स्वाहा नमः । नमः पिता । पिता पुत्रः । पुत्रः पौत्रः । पौत्रो वषट् । वषट्थ्स्वाहाँ । स्वाहा नमः । नमो भूः । भूर्भुवः । भुवस्सुवः । सुवर्वषट् । वषट्थ्स्वाहाँ । स्वाहा नमः । नम इति नमः () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -13, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

आ मैँ । मे गृहाः । गृहा भवन्तु । भवन्त्वा । आ प्रजा । प्रजा मैँ । प्रजेति प्र-जा । म आ । आ माँ । मा यज्ञः । यज्ञो विशतु । विशतु वीर्यावान् । वीर्यावानिति वीर्य-वान् ॥ आपो देवीः । देवीर्यज्ञियाँः । यज्ञिया मा । मा । आ विशन्तु । विशन्तु सहस्रस्य । सहस्रस्य मा । मा भूमा । भूमा मा । मा प्र । प्र हासीत् । हासीदिति हासीत् ॥ आ मैँ । मे ग्रहः । ग्रहो भवतु । भवत्वा । आ पुरोरुक् । पुरोरुक्स्तुतशस्त्रे । पुरोरुगिति पुरः-रुक् । स्तुतशस्त्रे माँ । स्तुतशस्त्रे इति स्तुत-शस्त्रे । मा । आ विशताम् । विशताꣳ समीचीँ । समीची इति समीचीँ ॥ आदित्या रुद्राः । रुद्रा वसवः । वसवो मे । मे सदस्याँः । सदस्याँस्सहस्रस्य । सहस्रस्य मा । मा भूमा । भूमा मा । मा प्र । प्र हासीत् । हासीदिति हासीत् ॥ आ माँ । माऽग्निष्टोमः । अग्निष्टोमो विशतु । अग्निष्टोम इत्यग्नि-स्तोमः । विशतूक्थ्यः । उक्थ्यश्च । चातिरात्रः । अतिरात्रो माँ । अतिरात्र इत्यति-रात्रः । मा । आ विशतु । विशत्वापिशर्वरः । आपिशर्वर इत्यापि-शर्वरः ॥ तिरो?अह्निया मा । तिरो?अह्निया इति तिरः-अह्नियाः । मा सुहुताः । सुहुता आ । सुहुता इति सु-

हुताः । आ विशन्तु । विशन्तु सहस्रस्य । सहस्रस्य मा । मा भूमा । भूमा मा । मा प्र । प्र हासीत् । हासीदिति हासीत् () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -14, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

अग्निना तपः । तपोऽनु । अन्वभवत् । अभवद्वाचा । वाचा ब्रह्म । ब्रह्मणिनाँ । मणिनां रूपाणि । रूपाणीन्द्रेण । इन्द्रेण देवान् । देवान् वातेन । वातेन प्राणान् । प्राणान्थ्सूर्येण । प्राणानिति प्र-अनान् । सूर्येण द्यां । द्यां चन्द्रमसा । चन्द्रमसा नक्षत्राणि । नक्षत्राणि यमेन । यमेन पितॄन् । पितॄन्राज्ञाँ । राज्ञां मनुष्यान् । मनुष्याँन्फलेन । फलेन नादेयान् । नादेयानजगरेण । अजगरेण सर्पान् । सर्पान्व्याघ्रेण । व्याघ्रेणारण्यान् । आरण्यान्पशून् । पशून्छ्येनेन । श्येनेन पतत्रिणः । पतत्रिणो वृष्णाँ । वृष्णाऽश्वान् । अश्वानृषभेण । ऋषभेण गाः । गा बस्तेन । बस्तेनाजाः । अजावृष्णिनाँ । वृष्णिनाऽवीः । अवींर्व्रीहिणाँ । व्रीहिणाऽन्नानि । अन्नानि यवेन । यवेनोषधीः । ओषधीर्न्यग्रोधेन । न्यग्रोधेन वनस्पतीन् । वनस्पतीनुदु-म्बरेण । उदुम्बरेणोर्जं । ऊर्जं गायत्रिया । गायत्रिया छन्दाꣳसि । छन्दाꣳसि त्रिवृताँ । त्रिवृता स्तोमान् । त्रिवृतेति त्रि-वृताँ । स्तोमाँन्ब्राह्मणेन । ब्राह्मणेन वाचँ । वाचमिति वाचँ () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -15, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

स्वाहाऽधिम् । आधिमाधीताय । आधिमित्याँ-धिम् । आधीताय स्वाहाँ । आधीतायेत्या-धीताय । स्वाहा स्वाहाँ । स्वाहाऽधीतं । आधीतं मनसे । आधीतमित्या-धीतम् । मनसे स्वाहाँ । स्वाहा स्वाहाँ । स्वाहा मनः । मनः प्रजापतये । प्रजापतये स्वाहाँ । प्रजापतय इति प्रजा-पतये । स्वाहा कायं । काय स्वाहाँ । स्वाहा कस्मै । कस्मै स्वाहाँ । स्वाहा कतमस्मै । कतमस्मे स्वाहाँ । स्वाहाऽदित्ये । अदित्ये स्वाहाँ । स्वाहाऽदित्ये । अदित्ये मह्यै । मह्यै स्वाहाँ ।

स्वाहाऽदित्यै । अदित्यै सुमृडिकायै । सुमृडिकायै स्वाहा । सुमृडिकाया इति सु-मृडीकायै । स्वाहा सरस्वत्यै । सरस्वत्यै स्वाहा । स्वाहा सरस्वत्यै । सरस्वत्यै बृहत्यै । बृहत्यै स्वाहा । स्वाहा सरस्वत्यै । सरस्वत्यै पावकायै । पावकायै स्वाहा । स्वाहा पूष्णे । पूष्णे स्वाहा । स्वाहा पूष्णे । पूष्णे प्रपथ्याय । प्रपथ्याय स्वाहा । प्रपथ्यायेति प्र-पथ्याय । स्वाहा पूष्णे । पूष्णे नरन्धिषाय । नरन्धिषाय स्वाहा । स्वाहा बष्ट्रै । बष्ट्रे स्वाहा । स्वाहा बष्ट्रै । बष्ट्रे तुरीपाय । तुरीपाय स्वाहा । स्वाहा बष्ट्रै । बष्ट्रे पुरुरूपाय । पुरुरूपाय स्वाहा । पुरुरूपायेति पुरु-रूपाय । स्वाहा विष्णवे । विष्णवे स्वाहा । स्वाहा विष्णवे । विष्णवे निखुर्यपाय । निखुर्यपाय स्वाहा । निखुर्यपायेति निखुर्य-पाय । स्वाहा विष्णवे । विष्णवे निभूय-पाय । निभूयपाय स्वाहा । निभूयपायेति निभूय-पाय । स्वाहा सर्वस्मै । सर्वस्मै स्वाहा । स्वाहेति स्वाहा () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -16, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

दद्भ्यस्स्वाहा । दद्भ्य इति दत्-भ्यः । स्वाहा हनूभ्यां । हनूभ्याꣳ स्वाहा । हनूभ्यामिति हनु-भ्याम् । स्वाहोष्ठाभ्यां । ओष्ठाभ्याꣳ स्वाहा । स्वाहा मुखाय । मुखाय स्वाहा । स्वाहा नासिकाभ्यां । नासिकाभ्याꣳ स्वाहा । स्वाहाऽक्षीभ्यां । अक्षीभ्याꣳ स्वाहा । स्वाहा कर्णाभ्यां । कर्णाभ्याꣳ स्वाहा । स्वाहा पारे । पार इक्षवः । इक्षवोऽवार्यैभ्यः । अवार्यैभ्यः पक्ष्मभ्यः । पक्ष्मभ्यस्स्वाहा । पक्षभ्य इति पक्ष्म-भ्यः । स्वाहाऽवारे । अवार इक्षवः । इक्षवः पार्यैभ्यः । पार्यैभ्यः पक्ष्मभ्यः । पक्ष्मभ्यस्स्वाहा । पक्ष्मभ्य इति पक्ष्म-भ्यः । स्वाहा शीष्णे । शीर्ष्णे स्वाहा । स्वाहा भ्रूभ्यां । भ्रूभ्याꣳ स्वाहा । स्वाहा ललाटाय । ललाटाय स्वाहा । स्वाहा मूर्ध्ने । मूर्ध्ने स्वाहा । स्वाहा मस्तिष्काय । मस्तिष्काय स्वाहा । स्वाहा केशेभ्यः । केशेभ्यस्स्वाहा । स्वाहा वहाय । वहाय स्वाहा । स्वाहा ग्रीवाभ्यः । ग्रीवाभ्य स्स्वाहा । स्वाहा स्कन्धेभ्यः । स्कन्धेभ्य स्स्वाहा । स्वाहा कीकसाभ्यः । कीकसाभ्यस्स्वाहा । स्वाहा पृष्टीभ्यः । पृष्टीभ्यस्स्वाहा । पृष्टीभ्य इति पृष्टि-भ्यः । स्वाहा पाजस्याय । पाजस्याय स्वाहा । स्वाहा पार्श्वाभ्यां । पार्श्वाभ्याꣳ स्वाहा । स्वाहाꣳ साभ्यां ()

काण्ड -7, प्रपाठक -3, अनुवाक -16, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

। अꣳसाँभ्याꣳ स्वाहाँ । स्वाहा॑ दोषभ्याँ । दोषभ्याꣳ स्वाहाँ । दोषभ्यामिति॑ दोष-भ्या॑म् । स्वाहा॑ बाहुभ्याँ । बाहुभ्याꣳ स्वाहाँ । बाहुभ्यामिति॑ बाहु-भ्या॑म् । स्वाहा॑ जङ्घाँभ्यां । जङ्घाँभ्याꣳ स्वाहाँ । स्वाहा॑ श्रोणीँभ्यां । श्रोणीँभ्याꣳ स्वाहाँ । श्रोणीँभ्यामिति॑ श्रोणि॑-भ्या॑म् । स्वाहो॑रुभ्याँ । ऊ॒रुभ्याꣳ स्वाहाँ । ऊ॒रुभ्यामित्यू॒रु-भ्या॑म् । स्वाहाँऽष्ठीवद्भ्याँ । अ॒ष्ठीव॒द्भ्याꣳ स्वाहाँ । अ॒ष्ठीव॒द्भ्यामित्य॑ष्ठीवत्-भ्या॑म् । स्वाहा॑ जञ्जाँभ्यां । जङ्घाँभ्याꣳ स्वाहाँ । स्वाहा॑ भ॒सदे॑ । भ॒सदे॒ स्वाहाँ । स्वाहा॑ शिख॒ण्डेभ्य॑ः । शिख॒ण्डेभ्य॒स्स्वाहाँ । स्वाहा॑ वाल॒धाना॑य । वा॒ल॒धाना॑य॒ स्वाहाँ । वा॒ल॒धाना॒येति॑ वाल-धाना॑य । स्वाहाऽण्डाभ्याँ । आ॒ण्डाभ्याꣳ स्वाहाँ । स्वाहा॒ शेपा॑य । शेपा॑य॒ स्वाहाँ । स्वाहा॒ रेत॑से । रेत॑से॒ स्वाहाँ । स्वाहाँ प्र॒जाभ्य॑ः । प्र॒जाभ्य॒स्स्वाहाँ । प्र॒जाभ्य॒ इति॑ प्र-जाभ्य॑ः । स्वाहाँ प्र॒जन॑नाय । प्र॒जन॑नाय॒ स्वाहाँ । प्र॒जन॑नाय॒ेति॑ प्र-जन॑नाय । स्वाहा॑ प॒द्भ्यः । प॒द्भ्यस्स्वाहाँ । प॒द्भ्य इति॑ पत्-भ्यः । स्वाहा॑ शृ॒फेभ्य॑ः । शृ॒फेभ्य॒स्स्वाहाँ । स्वाहा॒ लोम॑भ्यः । लोम॑भ्य॒ः स्वाहाँ । लोम॑भ्य॒ इति॒ लोम॑-भ्य॒ः । स्वाहाँ ब्लू॒चे । ब्लू॒चे स्वाहाँ । स्वाहा॒ लोहि॑ताय । लोहि॑ताय॒ स्वाहाँ । स्वाहा॑मा॒ꣳ साय॑ । मा॒ꣳ साय॒स्वाहाँ । स्वाहा॒ स्नाव॑भ्यः । स्नाव॑भ्य॒ः स्वाहाँ । स्नाव॑भ्य॒ इति॒ स्नाव॑-भ्य॒ः । स्वाहाऽस्थभ्य॑ः । अ॒स्थभ्य॒ः स्वाहाँ । अ॒स्थभ्य॒ इत्य॒स्थ-भ्य॒ः । स्वाहा॑ म॒ज्ज्ञभ्य॑ः । म॒ज्ज्ञभ्य॒ः स्वाहाँ । म॒ज्ज्ञभ्य॒ इति॑ म॒ज्ज्ञ-भ्य॒ः । स्वाहाऽङ्गेँभ्यः । अङ्गेँभ्य॒ः स्वाहाँ । स्वाहाऽऽत्मनेँ । आ॒त्मने॒ स्वाहाँ । स्वाहा॒ सर्व॑स्मै । सर्व॑स्मै॒ स्वाहाँ । स्वाहे॒ति॒ स्वाहाँ () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -17, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

अ॒ज्ये॒ताय॒ स्वाहाँ । अ॒ज्ये॒तायेत्य॑जि-ए॒ताय॑ । स्वाहाँऽजिसक्थाय॑ । अ॒जि॒सक्थाय॒ स्वाहाँ । अ॒जि॒सक्थायेत्य॑जि-सक्थाय॑ । स्वाहा॑ शितिप॒दे॑ । शि॒ति॒पदे॒ स्वाहाँ । शि॒ति॒पद॒ इति॑ शिति-पदे॑ । स्वाहा॒ शिति॑ककुदे । शिति॑ककुदे॒ स्वाहाँ ।

शितिंककुद इति शितिं-ककुदे । स्वाहा शितिरन्ध्राय । शितिरन्ध्राय स्वाहा" । शितिरन्ध्रायेतिं शिति-रन्ध्राय । स्वाहा शितिपृष्ठायं । शितिपृष्ठाय स्वाहा" । शितिपृष्ठायेतिं शिति-पृष्ठायं । स्वाहा शित्यꣳसाय । शित्यꣳसाय स्वाहा" । शित्यꣳसायेतिं शिति-अꣳसाय । स्वाहापुष्पकर्णाय । पुष्पकर्णाय स्वाहा" । पुष्पकर्णायेतिं पुष्प-कर्णाय । स्वाहा शित्योष्ठाय । शित्योष्ठाय स्वाहा" । शित्योष्ठायेतिं शिति-ओष्ठाय । स्वाहा शितिभ्रवै । शितिभ्रवे स्वाहा" । शितिभ्रव इतिं शिति-भ्रवै । स्वाहा शितिंभसदे । शितिंभसदे स्वाहा" । शितिंभसद इति शितिं-भसदे । स्वाहा" श्वेतानूंकाशाय । श्वेतानूंकाशाय स्वाहा" । श्वेतानूंकाशायेतिं श्वेत-अनूकाशाय । स्वाहांजयै । अंजये स्वाहा" । स्वाहा ललामाय । ललामाय स्वाहा" । स्वाहाऽसितज्ञवे । असितज्ञवे स्वाहा" । असितज्ञव इत्यसित-ज्ञवे । स्वाहा कृष्णेतायं । कृष्णेताय स्वाहा" । कृष्णेतायेतिं कृष्ण-एतायं । स्वाहा रोहितैतायं । रोहितैताय स्वाहा" । रोहितैतायेतिं रोहित-एतायं । स्वाहाऽरुणैतायं । अरुणैताय स्वाहा" । अरुणैतायेत्यरुण-एतायं । स्वाहेदृशाय । ईदृशाय स्वाहा" । स्वाहा कीदृशाय । कीदृशाय स्वाहा" । स्वाहा तादृशाय । तादृशाय स्वाहा" । स्वाहा सदृशाय । सदृशाय स्वाहा" । स्वाहा विसदृशाय । विसदृशाय स्वाहा" । विसृदृशायेतिवि-सदृशाय । स्वाहा सुसदृशाय । सुसदृशाय स्वाहा" । सुसदृशायेति सु-सदृशाय । स्वाहा रूपायं । रूपाय स्वाहा" । स्वाहा सर्वस्मै । सर्वस्मै स्वाहा" । स्वाहेति स्वाहा" () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -18, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

कृष्णाय स्वाहा" । स्वाहा" श्वेतायं । श्वेताय स्वाहा" । स्वाहा पिशंगांय । पिशंगांय स्वाहा" । स्वाहा सारंगांय । सारंगांय स्वाहा" । स्वाहाऽरुऽणायं । अरुणाय स्वाहा" । स्वाहा गौरायं । गौराय स्वाहा" । स्वाहा बभ्रवै । बभ्रवे स्वाहा" । स्वाहा नकुलायं । नकुलाय स्वाहा" । स्वाहारोहिंताय । रोहिंताय स्वाहा" । स्वाहा शोणांय । शोणांय स्वाहा" । स्वाहा" श्यावायं । श्यावाय स्वाहा" । स्वाहा" श्यामायं । श्यामाय स्वाहा" । स्वाहा पाकलायं । पाकलाय स्वाहा" । स्वाहा सुरूपायं । सुरूपाय स्वाहा" । सुरूपायेतिं सु-रूपायं । स्वाहाऽनुंरूपाय । अनुंरूपाय स्वाहा" । अनुंरूपायेत्यनुं-रूपाय । स्वाहा

विरू॑पाय । विरू॑पाय॒ स्वाहा॑ । विरू॑पायेति॒ वि-रू॒पा॒य॒ । स्वाहा॒ सरू॑पाय । सरू॑पाय॒ स्वाहा॑ । सरू॑पायेति॒ स-रू॒पा॒य॒ । स्वाहा॒ प्रति॑रूपाय । प्रति॑रूपाय॒ स्वाहा॑ । प्रति॑रूपायेति॒ प्रति॑-रू॒पा॒य॒ । स्वाहा॑ शबला॑य । शबला॑य॒ स्वाहा॑ । स्वाहा॑ कमला॑य । कमला॑य॒ स्वाहा॑ । स्वाहा॒ पृश्न॑ये । पृश्न॑ये॒ स्वाहा॑ । स्वाहा॑ पृश्निसक्थाय॑ । पृश्निसक्थाय॒ स्वाहा॑ । पृश्निसक्थायेति॑ पृश्नि-सक्थाय॑ । स्वाहा॒ सर्व॑स्मै । सर्व॑स्मै॒ स्वाहा॑ । स्वाहेति॒ स्वाहा॑ () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -19, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

ओष॑धीभ्यः॒ स्वाहा॑ । ओष॑धीभ्य॒ इत्योष॑धि-भ्यः । स्वाहा॒ मूले॑भ्यः । मूले॑भ्य॒स्स्वाहा॑ । स्वाहा॒ तूले॑भ्यः । तूले॑भ्य॒स्स्वाहा॑ । स्वाहा॒ कांडे॑भ्यः । कांडे॑भ्य॒स्स्वाहा॑ । स्वाहा॒ वल्शे॑भ्यः । वल्शे॑भ्यः॒ स्वाहा॑ । स्वाहा॒ पुष्पे॑भ्यः । पुष्पे॑भ्य॒स्स्वाहा॑ । स्वाहा॒ फले॑भ्यः । फले॑भ्य॒स्स्वाहा॑ । स्वाहा॑ गृही॒तेभ्य॑ः । गृही॒तेभ्य॒स्स्वाहा॑ । स्वाहाऽगृ॑हीतेभ्यः । अगृ॑हीतेभ्य॒स्स्वाहा॑ । स्वाहाऽव॑पन्नेभ्यः । अव॑पन्नेभ्य॒स्स्वाहा॑ । अव॑पन्नेभ्य॒ इत्यव॑-प॒न्ने॒भ्यः॒ । स्वाहा॒ शया॑नेभ्यः । शया॑नेभ्यः॒ स्वाहा॑ । स्वाहा॒ सर्व॑स्मै । सर्व॑स्मै॒ स्वाहा॑ । स्वाहेति॒ स्वाहा॑ () ॥॥

काण्ड -7, प्रपाठक -3, अनुवाक -20, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -अश्वमेधः,

वन॒स्पति॑भ्य॒स्स्वाहा॑ । वन॒स्पति॑भ्य॒ इति॒ वन॒स्पति॑-भ्यः । स्वाहा॒ मूले॑भ्यः । मूले॑भ्य॒स्स्वाहा॑ः । स्वाहा॒ तूले॑भ्यः । तूले॑भ्य॒स्स्वाहा॑ । स्वाहा॒ स्कंधे॑भ्यः । स्कंधे॑भ्य॒स्स्वाहा॑ । स्कंधे॑भ्य॒ इति॒ स्कंध॑-भ्यः॒ । स्वाहा॒ शाखा॑भ्यः । शाखा॑भ्य-स्स्वाहा॑ । स्वाहा॑ पर्णे॑भ्य॑ः । पर्णे॑भ्य॒स्स्वाहा॑ । स्वाहा॒ पुष्टे॑भ्यः । पुष्टे॑भ्य- स्स्वाहा॑ । स्वाहा॒ फले॑भ्यः । फले॑भ्य॒स्स्वाहा॑ । स्वाहा॑ गृही॒तेभ्य॑ः । गृही॒तेभ्य॒-स्स्वाहा॑ । स्वाहाऽगृ॑हीतेभ्यः । अगृ॑हीतेभ्य॒स्स्वाहा॑ । स्वाहाऽव॑पन्नेभ्यः । अव॑पन्नेभ्यः॒ स्वाहा॑ । अव॑पन्नेभ्य॒ इत्यव॑-प॒न्ने॒भ्यः॒ । स्वाहा॒ शया॑नेभ्यः । शया॑नेभ्यः॒ स्वाहा॑ । स्वाहा॑ शिष्टाय॑ । शिष्टाय॒ स्वाहा॑ । स्वाहाऽति॑शिष्टाय

। अतिशिष्टाय स्वाहा" । अतिशिष्टायेत्यति-शिष्टाय । स्वाहा परिशिष्टाय । परिशिष्टाय स्वाहा" । परिशिष्टायेति परि-शिष्टाय । स्वाहा सꣳशिष्टाय । सꣳशिष्टाय स्वाहा" । सꣳशिष्टायेति सं-शिष्टाय । स्वाहोच्छिष्टाय । उच्छिष्टाय स्वाहा" । उच्छिष्टायेत्युत्-शिष्टाय । स्वाहा रिक्ताय । रिक्ताय स्वाहा" । स्वाहाऽरिक्ताय । अरिक्ताय स्वाहा" । स्वाहा प्ररिक्ताय । प्ररिक्ताय स्वाहा" । प्ररिक्तायेति प्र-रिक्ताय । स्वाहा सꣳरिक्ताय । सꣳरिक्ताय स्वाहा" । सꣳरिक्तायेति सं-रिक्ताय । स्वाहोद्रिक्ताय । उद्रिक्ताय स्वाहा" । उद्रिक्तायेत्युत्-रिक्ताय । स्वाहा सर्वस्मै । सर्वस्मै स्वाहा" । स्वाहेति स्वाहा" () ॥॥

काण्ड -7, प्रपाठक -4, अनुवाक -1, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

॥ इति सप्तमकांडे तृतीयप्रश्नस्य क्रमपाठः समाप्तः ॥ क्रमपाठः बृहस्पतिरकामयत । अकामयत श्रत् । श्रन्मै । मे देवाः । देवा दधीरन्न् । दधीरन्नच्छेयं । गच्छेयं पुरोधां । पुरोधामिति । पुरोधामिति पुरः-धाम् । इति सः । स एतं । एतं चतुर्विꣳशतिरात्रं । चतुर्विꣳशति-रात्रमपश्यत् । चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति-रात्रम् । अपश्यत्तं । त मा । आहरत् । अहरत्तेनं । तेनायजत । अयजत ततः । ततो वै । वै तस्मै । तस्मे श्रत् । श्रदेवाः । देवा अदधत । अदधतागच्छत् । अगच्छत्पुरोधां । पुरोधां ये । पुरोधामिति पुरः-धाम् । य एवं । एवं विद्वाꣳसः । विद्वाꣳसश्चतुर्विꣳशतिरात्रम् । चतुर्विꣳशतिरात्र मासते । चतुर्विꣳशति-रात्रमिति चतुर्विर्ꣳशति-रात्रं । आसते श्रत् । श्रदैभ्यः । एभ्यो मनुष्याः" । मनुष्यां दधते । दधते गच्छन्ति । गच्छन्ति पुरोधां । पुरोधां ज्योतिः । पुरोधामिति पुरः-धाम् । ज्योतिर्गौः । गौरायुः । आयुरिति । इति त्र्यहाः । त्र्यहा भवन्ति । त्र्यहा इति त्रि-अहाः । भवन्तीयं । इयं वाव । वाव ज्योतिः । ज्योतिरन्तरिक्षं । अन्तरिक्षं गौः । गौरसौ । असावायुः । आयुरिमान् ()

काण्ड -7, प्रपाठक -4, अनुवाक -1, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। इमानेव । एव लोकान् । लोकानभ्यारोहन्ति । अभ्यारोहन्त्यभिपूर्वं । अभ्यारोहन्तीत्यभि-आरोहन्ति । अभिपूर्वं त्र्यहाः । अभिपूर्वमित्यभि-पूर्वम् । त्र्यहा भवन्ति । त्र्यहा इति त्रि-अहाः । भवन्त्यभिपूर्वं । अभिपूर्वमेव । अभिपूर्वमित्यभि-पूर्वम् । एव सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकमभ्यारोहन्ति । अभ्यारोहन्त्यसत्रं । अभ्यारोहन्तीत्यभि-आरोहन्ति । असत्रं वै । वा एतत् । एतद्यत् । यदछन्दोमं । अछन्दोमं यत् । अछन्दोममित्यछन्दः-मम् । यच्छन्दोमाः । छन्दोमा भवन्ति । छन्दोमा इति छन्दः-माः । भवन्ति तेन । तेन सत्रम् । सत्रम् देवताः । देवता एव । एव पृष्ठैः । पृष्ठैरव । अव रुन्धते । रुन्धते पशून् । पशून्छन्दोमैः । छन्दोमैरोजः । छन्दोमैरिति छन्दः-मैः । ओजो वै । वै वीर्यं । वीर्यं पृष्ठानि । पृष्ठानि पशवः । पशवश्छन्दोमाः । छन्दोमा ओजसि । छन्दोमा इति छन्दः-माः । ओजस्येव । एव वीर्ये । वीर्ये पशुषु । पशुषु प्रति । प्रति तिष्ठन्ति । तिष्ठन्ति बृहद्रथराभ्याँ । बृहद्रथन्तराभ्याँ यन्ति । बृहद्रथन्तराभ्यामिति बृहत्-रथन्तराभ्याँ । यन्तीयं । इयं वाव । वाव रथन्तरं । रथन्तरमसौ । रथन्तरमिति रथं- तरम् । असौ बृहत् । बृहदाभ्यां । आभ्यामेव । एव यन्ति ()

काण्ड -7, प्रपाठक -4, अनुवाक -1, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। यन्त्यथौ । अथो अनयोः । अथो इत्यथो । अनयोरेव । एव प्रति । प्रति तिष्ठन्ति । तिष्ठन्त्येते । एते वै । एते इत्येते । वै यज्ञस्य । यज्ञस्याँज्रसाऽयनी । अंज्रसायनी स्रुती । अंज्रसाऽयनी इत्यंजसा-अयनी । स्रुती ताभ्याँ । स्रुती इति स्रुती । ताभ्यामेव । एव सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकं यन्ति । यन्ति चतुर्विꣳशतिरात्रः । चतुर्विꣳशतिरात्रो भवति । चतुर्विꣳशतिरात्र इति चतुर्विꣳशति-रात्रः । भवति चतुर्विꣳशतिः । चतुर्विꣳशतिरर्धमासाः । चतुर्विꣳशतिरिति चतुः-विꣳशतिः । अर्धमासा-स्संवथ्सरः । अर्धमासा इत्यर्ध-मासाः । संवथ्सरस्संवथ्सरः । संवथ्सर इति सं-वथ्सरः । संवथ्सरस्सुवर्गः । संवथ्सर इति सं-वथ्सरः । सुवर्गो लोकः । सुवर्ग इति सुवः-गः । लोकस्संवथ्सरे । संवथ्सर एव । संवथ्सर इति सं- वथ्सरे । एव सुवर्गे । सुवर्गे लोके । सुवर्ग इति सुवः-गे । लोके प्रति । प्रति

तिष्ठन्ति । तिपन्त्यथौ । अथो चतुर्विꣳशत्यक्षरा । अथो इत्यथौ । चतुर्विꣳशत्यक्षरागायत्री । चतुर्विꣳशत्यक्षरेति चतुर्विꣳशति-अक्षरा । गायत्री गायत्री । गायत्री ब्रह्मवर्चसं । ब्रह्मवर्चसं गायत्रिया । ब्रह्मवर्चमिति ब्रह्म-वर्चसं । गायत्रियैव । एव ब्रह्मवर्चसं । ब्रह्मवर्चसमव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसं । अवरुन्धते । रुन्धतेऽति रात्रौ । अतिरात्रावभितः । अतिरात्रा वित्यति-रात्रौ । अभितो भवतः । भवतो ब्रह्मवर्चसस्य । ब्रह्मवर्चसस्य परिगृहीत्यै । ब्रह्मवर्चसस्येति ब्रह्म-वर्चसस्य । परिगृहित्या इति परि-गृहीत्यै () ॥॥

काण्ड -7, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

यथा वै । वै मनुष्याः । मनुष्या एवं । एवं देवाः । देवा अग्रै । अग्र आसन् । आसन्ते । तेऽकामयन्त । अकामयन्तावर्तिं । अवर्तिं पाप्मानँ । पाप्मानं मृत्युं । मृत्युमपहत्य । अपहत्य दैवीँ । अपहत्येतप-हत्य । दैवीꣳ सꣳसदँ । सꣳसद गच्छेम । सꣳसदमिति सं-सदँ । गच्छेमेति । इति ते । त एतं । एतं चतुर्विꣳशतिरात्रम् । चतुर्विꣳशतिरात्रमपश्यन् । चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति-रात्रम् । अपश्यन्तं । तमा । आहरन्न् । अहरन्तेनं । तेनायजन्त । अयजन्त ततः । ततो वै । वै ते । तेऽवर्तिं । अवर्तिं पाप्मानँ । पाप्मानं मृत्युं । मृत्युमपहत्य । अपहत्य दैवीँ । अपहत्येत्यप-हत्य । दैवीꣳ सꣳसदँ । सꣳसदमगच्छन् । सꣳसदमिति सं-सदँम् । अगच्छन्, ये । य एवं । एवं विद्वाꣳसः । विद्वाꣳसश्चतुर्विꣳशति- रात्रं । चतुर्विꣳशतिरात्रमासते । चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति-रात्रम् । आसतेऽवर्तिम् । अवर्तिमेव । एव पाप्मानँ । पाप्मानमपहत्य । अपहत्य श्रियँ । अपहत्येत्यप-हत्य । श्रियं गच्छन्ति । गच्छन्ति श्रीः । श्रीर् हि । हि मनुष्यस्य । मनुष्यस्य दैवीँ ()

काण्ड -7, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। दैवी꣡ स꣡꣯ꣳसत् । स꣡꣯ꣳसज्ज्योतिः꣡ । स꣡꣯ꣳसदिति꣡ सं-सत् । ज्योति꣡रतिरा꣡त्रः । अ꣡तिरा꣡त्रो भ꣡वति । अ꣡तिरा꣡त्र इत्य꣡ति-रा꣡त्रः । भ꣡वति सु꣡वर्गस्य꣡ । सु꣡वर्गस्य लो꣡कस्य꣡ । सु꣡वर्गस्येति꣡ सुवः-गस्य꣡ । लो꣡कस्यानु꣡ख्यात्ये । अनु꣡ख्यात्ये पृष्ठः꣡ । अनु꣡ख्यात्या इत्यनु꣡-ख्यात्ये । पृष्ठ꣡ष्षड꣡हः । ष꣡ड꣡हो भ꣡वति । ष꣡ड꣡ह इति꣡ षट्-अ꣡हः । भ꣡वति षट् । षड्भि꣡ । वा ऋ꣡तवः꣡ । ऋ꣡तव꣡स्स꣡ंवथ्स꣡रः । स꣡ंव꣡थ्स꣡रस्तं । स꣡ंव꣡थ्स꣡र इति꣡ सं-व꣡थ्स꣡रः । तं मासा꣡ः । मासा꣡ अर्धमा꣡साः । अ꣡र्धमा꣡सा ऋ꣡तवः꣡ । अ꣡र्धमा꣡सा इत्य꣡र्ध-मा꣡सा꣡ः । ऋ꣡तवः꣡ प्र꣡विश्य꣡ । प्र꣡विश्य देवी꣡ । प्र꣡विश्येति꣡ प्र-विश्य꣡ । दैवी꣡ꣳ स꣡꣯ꣳसद꣡ । स꣡꣯ꣳसद꣡-मगच्छन् । स꣡꣯ꣳसद꣡मिति꣡ सं-सद꣡ । अ꣡गच्छ꣡न्, ये । य एवम् । एवं वि꣡द्वा꣡ꣳसः । वि꣡द्वा꣡ꣳस꣡श्चतुर्वि꣡ꣳशतिरा꣡त्रं । चतुर्वि꣡ꣳशतिरा꣡त्रमास꣡ते । चतुर्वि꣡ꣳशतिरा꣡त्रमिति꣡ चतुर्वि꣡ꣳशति-रा꣡त्रम् । आस꣡ते संवथ्स꣡रं । स꣡ंव꣡थ्स꣡र मेव । स꣡ंव꣡थ्स꣡रमिति꣡ सं-व꣡थ्स꣡रम् । एव प्र꣡विश्य꣡ । प्र꣡विश्य वस्य꣡सीं । प्र꣡विश्येति꣡ प्र-विश्य꣡ । वस्य꣡सीꣳ स꣡꣯ꣳसद꣡ । स꣡꣯ꣳसद꣡ गच्छन्ति । स꣡꣯ꣳसद꣡मिति꣡ सं-सद꣡ । ग꣡च्छ꣡न्ति त्रय꣡ः । त्रय꣡स्त्रयस्त्रि꣡ꣳशाः । त्र꣡यस्त्रि꣡ꣳशा अ꣡वस्ता꣡त् । त्र꣡यस्त्रि꣡ꣳशा इति꣡ त्रयः-त्रि꣡ꣳशाः । अ꣡वस्ता꣡द्भवन्ति । भ꣡वन्ति त्रय꣡ः । त्रय꣡स्त्रयस्त्रि꣡ꣳशाः । त्र꣡यस्त्रि꣡ꣳशाः प꣡रस्ता꣡त् । त्र꣡यस्त्रि꣡ꣳशा इति꣡ त्रयः-त्रि꣡ꣳशाः । प꣡रस्ता꣡त्त्रयस्त्रि꣡ꣳ शैः । त्र꣡यस्त्रि꣡ꣳशैरेव । त्र꣡यस्त्रि꣡ꣳशैरिति꣡ त्रयः-त्रि꣡ꣳशैः । ए꣡वोऽभयतः꣡ । उ꣡भयतोऽव꣡र्ति । अव꣡र्ति पा꣡प्मान꣡ं । पा꣡प्मान꣡मप꣡हत्य꣡ । अ꣡प꣡हत्य देवी꣡ । अ꣡प꣡हत्येत्य꣡प-हत्य꣡ । दैवी꣡ꣳ स꣡꣯ꣳसद꣡ । स꣡꣯ꣳसद꣡ मध्य꣡तः । स꣡꣯ꣳसद꣡मिति꣡ सं-सद꣡ । म꣡ध्य꣡तो ग꣡च्छन्ति ()

काण्ड -7, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। ग꣡च्छ꣡न्ति पृ꣡ष्ठानि꣡ । पृ꣡ष्ठानि꣡ हि । हि देवी꣡ । दैवी꣡ स꣡꣯ꣳसत् । स꣡꣯ꣳसज्जामि । स꣡꣯ꣳसदिति꣡ सं-सत् । जा꣡मि वै । वा एत꣡त् । एत꣡त्कु꣡र्वन्ति । कु꣡र्वन्ति यत् । यत्त्रय꣡ः । त्र꣡यस्त्रयस्त्रि꣡ꣳशाः । त्र꣡यस्त्रि꣡ꣳशा अन्व꣡चः꣡ । त्र꣡यस्त्रि꣡ꣳशा इति꣡ त्रयः-त्रि꣡ꣳशाः । अन्व꣡चो मध्य꣡ै । मध्येऽनि꣡रुक्तः । अनि꣡रुक्तो भवति । अनि꣡रुक्त इत्यनि꣡ः-उक्तः । भ꣡वति तेन꣡ । तेनाजा꣡मि । अजा꣡म्यू꣡र्ध्वानि꣡ । ऊ꣡र्ध्वानि꣡ पृ꣡ष्ठानि꣡ । पृ꣡ष्ठानि꣡ भवन्ति । भ꣡वन्त्यू꣡र्ध्वाः । ऊ꣡र्ध्वाश्छ꣡न्दोमाः । छ꣡न्दोमा उभाभ्या꣡ । छ꣡न्दोमा इति꣡ छन्दः-मा꣡ः । उ꣡भाभ्या꣡ꣳ रू꣡पाभ्या꣡ । रू꣡पाभ्या꣡ꣳ सु꣡वर्गं । सु꣡वर्गं लो꣡कं । सु꣡वर्गमिति꣡ सुवः-गम् । लो꣡कं य꣡न्ति ।

यन्त्यसत्रं । असत्रं वै । वा एतत् । एतद्यत् । यदछन्दोमं । अछन्दोमं यत् । अछन्दोममित्यछन्दः-मम् । यच्छन्दोमाः । छन्दोमा भवन्ति । छन्दोमा इति छन्दः-माः । भवन्ति तेन । तेन सत्रं । सत्रं देवताः । देवता एव । एव पृष्ठैः । पृष्ठैरव । अव रुन्धते । रुन्धते पशून् । पशून्छन्दोमैः । छन्दोमैरोजः । छन्दोमैरिति छन्दः-मैः । ओजो वै । वै वीर्यं । वीर्यं पृष्ठानि । पृष्ठानि पशवः । पशवश्छन्दोमाः ()

काण्ड -7, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। छन्दोमा ओजसि । छन्दोमा इति छन्दः-माः । ओजस्येव । एव वीर्यं । वीर्ये पशुषु । पशुषु प्रति । प्रति तिष्ठन्ति । तिष्ठन्ति त्रयः । त्रयस्त्रयस्त्रिꣳशाः । त्रयस्त्रिꣳशा अवस्तात् । त्रयस्त्रिꣳशा इति त्रयः- त्रिꣳशाः । अवस्ताद्भवन्ति । भवन्ति त्रयः । त्रयस्त्रयस्त्रिꣳशाः । त्रयस्त्रिꣳशाः परस्तात् । त्रयस्त्रिꣳशा इति त्रयः-त्रिꣳशाः । परस्तान्मध्ये । मध्ये पृष्ठानि । पृष्ठान्युरः । उरो वै । वै त्रयस्त्रिꣳशाः । त्रयस्त्रिꣳशा आत्मा । त्रयस्त्रिꣳशा इति त्रयः-त्रिꣳशाः । आत्मा पृष्ठानि । पृष्ठान्यात्मनै । आत्मन एव । एव तत् । तद्यजमानाः । यजमानाः शर्म । शर्म नह्यन्ते । नह्यन्तेऽनार्त्यै । अनार्त्यै बृहद्रथन्तराभ्यां । बृहद्रथन्तराभ्यां यन्ति । बृहद्रथन्तराभ्यामिति बृहत्-रथन्तराभ्यां । यन्तीयं । इयं वाव । वाव रथन्तरं । रथन्तरमसौ । रथन्तरमिति रथं-तरम् । असौ बृहत् । बृहदाभ्यां । आभ्यामेव । एव यन्ति । यन्त्यथौ । अथो अनयोः । अथो इत्यथौ । अनयोरेव । एव प्रति । प्रति तिष्ठन्ति । तिष्ठन्त्येते । एते वै । एते इत्येते । वै यज्ञस्य । यज्ञस्यौ-जसाऽयनी । अंजसाऽयनी स्रुती । अंजसाऽयनी इत्यंजसा-अयनी । स्रुती ताभ्यां । स्रुती इति स्रुती । ताभ्यामेव । एव सुवर्गं ()

काण्ड -7, प्रपाठक -4, अनुवाक -2, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। सुवर्गं लोकम् । सुवर्गमिति सुवः-गम् । लोकं यन्ति । यन्ति पराँचः । पराँचो वै । वा एते । एते सुवर्गं । सुवर्गं लोकम् । सुवर्गमिति सुवः-गम् । लोकमभ्यारोहन्ति । अभ्यारोहन्ति ये । अभ्यारोहन्तीत्यभि-आरोहन्ति । ये पराचीनानि । पराचीनानि पृष्ठानि । पृष्ठान्युपयन्ति । उपयन्ति प्रत्यङ् । उपयन्तीत्युप-यन्ति । प्रत्यङ्ङहः । षडहो भवति । षडह इति षट्-अहः । भवति प्रत्यवरूढ्यै । प्रत्यवरूढ्या अथौ । प्रत्यवरोढ्या इति प्रति-अवरूढ्यै । अथो प्रतिष्ठित्यै । अथो इत्यथो । प्रतिष्ठित्या उभयोः । प्रतिष्ठित्या इति प्रति-स्थित्यै । उभयोर्लोकयोः । लोकयोर् ऋद्धा । ऋद्धोत् । उत्तिष्ठन्ति । तिष्ठन्ति त्रिवृतः । त्रिवृतोऽधि । त्रिवृत इति त्रि-वृतः । अधि त्रिवृतः । त्रिवृतमुप । त्रिवृतमिति त्रि-वृतं । उप यन्ती । यन्ति स्तोमानां । स्तोमानाꣳ संपत्यै । संपत्यै प्रभवाय । संपत्या इति सं-पत्यै । प्रभवाय ज्योतिः । प्रभवायेति प्र-भवाय । ज्योतिरग्निष्टोमः । अग्निष्टोमो भवति । अग्निष्टोम इत्यग्नि-स्तोमः । भवत्ययं । अयं वाव । वाव सः । स क्षयः । क्षयोऽस्मात् । अस्मादेव । एव तेन । तेन क्षयात् । क्षयान्न । न यन्ति । यन्ति चतुर्विꣳशति-रात्रः । चतुर्विꣳशतिरात्रो भवति । चतुर्विꣳशतिरात्र इति चतुर्विꣳशति-रात्रः । भवति चतुर्विꣳशतिः । चतुर्विꣳशतिरर्धमासाः । चतुर्विꣳशतिरिति चतुः-विꣳशतिः । अर्धमासास्संवथ्सरः । अर्धमासा इत्यर्ध-मासाः । संवथ्सरस्संवथ्सरः । संवथ्सर इति सं-वथ्सरः । संवथ्सरस्सुवर्गः । संवथ्सर इति सं-वथ्सरः । सुवर्गो लोकः । सुवर्ग इति सुवः-गः । लोकस्संवथ्सरे । संवथ्सर एव । संवथ्सर इति सं-वथ्सरे । एव सुवर्गे । सुवर्गे लोके । सुवर्ग इति सुवः-गे । लोके प्रति । प्रति तिष्ठन्ति । तिष्ठन्त्यथौ । अथो चतुर्विꣳशत्यक्षरा । अथो इत्यथौ । चतुर्विꣳशत्यक्षरा गायत्री । चतुर्विꣳशत्यक्षरेति चतुर्विꣳशति-अक्षरा । गायत्री गायत्री । गायत्री ब्रह्मवर्चसं । ब्रह्मवर्चसं गायत्रिया । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । गायत्रियैव । एव ब्रह्मवर्चसं । ब्रह्मवर्चसमव । ब्रह्मवर्चसमिति ब्रह्म-वर्चसम् । अव रुन्धते । रुन्धतेऽति रात्रौ । अतिरात्रावबितः । अतिरात्रावित्यति-रात्रौ । अभितो भवतः । भवतो ब्रह्मवर्चसस्य । ब्रह्मवर्चसस्य परिगृहीत्यै । ब्रह्मवर्चस्यस्येति ब्रह्म-वर्चसस्य । परिगृहीत्या इति परि-गृहीत्यै () ॥॥

काण्ड -7, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

ऋक्षा वै । वा इयम् । इयमलोमकाँ । अलोमकाऽऽसीत् । आसीथ्सा । साकामयत । अकामय तौषधीभिः । ओषधीभिर्वनस्पतिभिः । ओषधीभिरित्योषधि- भिः । वनस्पतिभिः प्र । वनस्पतिभिरितिवनस्पति-भिः । प्र जायेय । जायेयेति । इति सा । सैताः । एतास्त्रिꣳशतँ । त्रिꣳशत्ꣳ रात्रीः । रात्रीरपश्यत् । अपश्यत्ततः । ततो वै । वा इयम् । इयमोषधीभिः । ओषधीभिर्वनस्पतिभिः । ओषधीभि-रित्योषधि-भिः । वनस्पतिभिः प्र । वनस्पतिभिरिति वनस्पति-भिः । प्राजायत । अजायत ये । ये प्रजाकामाः । प्रजाकामाः पशुकामाः । प्रजाकामा इति प्रजा- कामाः । पशुकामास्स्युः । पशुकामा इति पशु-कामाः । स्युस्ते । त एताः । एता आसीरन्न् । आसीरन्प्र । प्रैव । एव जायन्ते । जायन्ते प्रजयाँ । प्रजया पशुभिः । प्रजयेति प्र-जयाँ । पशुभिरियं । पशुभिरिति पशु-भिः । इयं वै । वा अक्षुध्यत् । अक्षुध्यत्सा । सैतां । एतां विराजँ । विराजमपश्यत् । विराजमिति वि-राजँ । अपश्यत्तां । तामात्मन् । आत्मन्धिबा । धिबाऽन्नाद्यँ । अन्नाद्यमवं । अन्नाद्यमित्यन्न-अद्यँ । अवारुन्ध । अरुन्धौषधीः । ओषधीर्वनस्पतीन् ()

काण्ड -7, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। वनस्पतीन्प्रजां । प्रजां पशून् । प्रजामिति प्र-जाम् । पशून्तेनं । तेना- वर्धत । अवर्धत सा । सा जेमानँ । जेमानं महिमानँ । महिमानमगच्छत् । अगच्छद्यो । य एवं । एवं विद्वाꣳसः । विद्वाग्सं एताः । एता आसते । आसते विराजँ । विराजमेव । विराजमिति वि-राजँ । एवात्मन्न् । आत्मन्धिबा । धिबाऽन्नाद्यँ । अन्नाद्यमवं । अन्नाद्यमित्यन्न-अद्यँ । अवं रुन्धते । रुन्धते वर्धन्ते । वर्धन्ते प्रजयाँ । प्रजया पशुभिः । प्रजयेति प्र-जयाँ । पशुभिर्जेमानँ । पशुभिरिति पशु-भिः । जेमानं महिमानँ । महिमानं गच्छन्ति । गच्छन्ति ज्योतिः । ज्योतिरतिरात्रः । अतिरात्रो भवति । अतिरात्र इत्यति- रात्रः । भवति सुवर्गस्य । सुवर्गस्य लोकस्य । सुवर्गस्येति सुवः-गस्यः । लोकस्यानुख्यात्यै । अनुख्यात्यै पृष्ठः । अनुख्यात्या इत्यनु-ख्यात्यै । पृष्ठष्षडहः । षडहो भवति । षडह इति षट्-

अहः । भवति षट् । षड्वै । वा ऋतवः । ऋतवष्षट् । षदृ्ष्ठानि । पृष्ठानि पृष्ठैः । पृष्ठैरेव । एवर्तून् । ऋतूनन्वारोहन्ति । अन्वारोहन्त्तुभिः । अन्वारोहन्तीत्यनु-आरोहन्ति । ऋतुभिस्संवथ्सरं । ऋतुभिरित्यतु-भिः । संवथ्सरं ते । संवथ्सरमितिं सं-वथ्सरं । ते संवथ्सरे । संवथ्सर एव । संवथ्सर इतिं सं-वथ्सरे । एव प्रतिं ()

काण्ड -7, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। प्रतिं तिष्ठन्ति । तिष्ठन्ति त्रयस्त्रिꣳशात् । त्रयस्त्रिꣳशात्त्रयस्त्रिꣳशं । त्रयस्त्रिꣳशादितिं त्रयः-त्रिꣳशात् । त्रयस्त्रिꣳशमुपं । त्रयस्त्रिꣳशमितिं त्रयः-त्रिꣳशम् । उपं यन्ति । यन्ति यज्ञस्यं । यज्ञस्य संतंत्यै । संतंत्या अर्थौं । संतंत्या इति सं-तत्यै । अर्थौं प्रजापंतिः । अथो इत्यर्थौं । प्रजापंतिर्वै । प्रजापंतिरितिं प्रजा-पतिः । वै त्रयस्त्रिꣳशः । त्रयस्त्रिꣳशः प्रजापंतिं । त्रयस्त्रिꣳश इतिं त्रयः-त्रिꣳशः । प्रजापंतिमेव । प्रजापंतिमितिं प्रजा-पतिं । एवा । आ रंभन्ते । रभन्ते प्रतिंष्ठित्यै । प्रतिंष्ठित्यै त्रिणवः । प्रतिंष्ठित्या इति प्रतिं-स्थित्यै । त्रिणवो भंवति । त्रिणव इतिं त्रि-नवः । भवति विजिंत्यै । विजिंत्या एकविꣳशः । विजंत्या इति वि-जित्यै । एकविꣳशो भंवति । एकविꣳश इत्येंक-विꣳशः । भवति प्रतिंष्ठित्यै । प्रतिंष्ठित्या अर्थौं । प्रतिंष्ठित्या इति प्रतिं-स्थित्यै । अथो रुचँ । अथो इत्यर्थौं । रुचंमेव । एवात्मन् । आत्मन्दंधते । दधते त्रिवृत् । त्रिवृदंग्निष्टुत् । त्रिवृदितिं त्रि-वृत् । अग्निष्टुद्भंवति । अग्निष्टुदित्यंग्नि-स्तुत् । भवति पाप्मानँ । पाप्मानंमेव । एव तेनं । तेन निः । निर्दंहन्ते । दहन्तेऽर्थौं । अथो तेजः । अथो इत्यर्थौं । तेजो वै । वै त्रिवृत् । त्रिवृत्तेजः । त्रिवृदितिं त्रि-वृत् । तेजं एव । एवात्मन् । आत्मन्दंधते । दधते पंचदशः । पंचदश इंन्द्रस्तोमः । पंचदश इतिं पंच- दशः । इंन्द्रस्तोमो भंवति । इंन्द्रस्तोम इतींन्द्र-स्तोमः । भवतींन्द्रियम् । इंन्द्रियमेव । एवावं । अवं रुन्धते ()

काण्ड -7, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। रुन्धते सप्तदशः । सप्तदशो भवति । सप्तदश इति सप्त-दशः । भवत्यन्नाद्यस्य । अन्नाद्यस्यावरुध्यै । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुध्या अथौ । अवरुध्या इत्यव-रुद्ध्यै । अथो प्र । अथो इत्यथौ । प्रैव । एव तेन । तेन जायन्ते । जायन्त एकविꣳशः । एकविꣳशो भवति । एकविꣳश इत्येक-विꣳशः । भवति प्रतिष्ठित्यै । प्रतिष्ठित्या अथौ । प्रतिष्ठित्या इति प्रति-स्थित्यै । अथो रुचँ । अथो इत्यथौ । रुचमेव । एवात्मन् । आत्मन्दधते । दधते चतुर्विꣳशः । चतुर्विꣳशो भवति । चतुर्विꣳश इति चतुः-विꣳशः । भवति चतुर्विꣳशतिः । चतुर्विꣳ शतिरर्धमासाः । चतुर्विꣳशतिरिति चतुः-विꣳशति । अर्धमासास्संवथ्सरः । अर्धमासा इत्यर्ध-मासाः । संवथ्सरस्संवथ्सरः । संवथ्सर इति सं-वथ्सरः । संवथ्सर स्सुवर्गः । संवथ्सर इति सं-वथ्सरः । सुवर्गो लोकः । सुवर्ग इति सुवः-गः । लोकस्संवथ्सरे । संवथ्सर एव । संवथ्सर इति सं-वथ्सरे । एव सुवर्गे । सुवर्गे लोके । सुवर्ग इति सुवः-गे । लोके प्रति । प्रति तिष्ठन्ति । तिष्ठन्त्यथौ । अथो एषः । अथो इत्यथौ । एष वै । वै विषूवान् । विषूवान् विषूवन्तः । विषूवानिति विषु-वान् । विषूवन्तो भवन्ति । विषूवन्त इति विषु-वन्तः । भवन्ति ये । य एवम् । एवम् विद्वाꣳसः । विद्वाꣳस एताः । एता आसते । आसते चतुर्विꣳशात् । चतुर्विꣳशात्पृष्ठानि । चतुर्विꣳशादिति चतुः-विꣳशात् । पृष्ठान्युप । उपयन्ति । यन्ति संवथ्सरे । संवथ्सर एव । संवथ्सर इति सं-वथ्सरे । एव प्रतिष्ठायै । प्रतिष्ठायै देवताः । पतिष्ठायेति प्रति-स्थायै ()

काण्ड -7, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -5,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। देवता अभ्यारोहन्ति । अभ्यारोहन्ति त्रयस्त्रिꣳशात् । अभ्यारोहन्तीत्यभि-आरोहन्ति । त्रयस्त्रिग्शात्त्रयस्त्रिꣳशम् । त्रयस्त्रिꣳशादिति त्रयःत्रिꣳशात् । त्रयस्त्रिꣳशमुप । त्रयस्त्रिꣳशमिति त्रयः-त्रिꣳशम् । उप यन्ति । यन्ति त्रयस्त्रिꣳशत् । त्रयस्त्रिꣳशद्वै । त्रयस्त्रिꣳशदिति त्रयः-त्रिꣳशत् । वै देवताः । देवता देवतासु । देवतास्त्रेव । एव प्रति । प्रति तिष्ठन्ति । तिष्ठन्ति त्रिणवः । त्रिणवो भवति । त्रिणव इति त्रि-नवः । भवतीमे । इमे वै । वै लोकाः । लोकास्त्रिणवः । त्रिणव एषु । त्रिणव इति त्रि-नवः । एष्वेव । एव लोकेषु । लोकेषु प्रति । प्रति तिष्ठन्ति । तिष्ठन्ति द्वौ । द्वावेकविꣳशौ ।

एकविꣳशो भवतः । एकविꣳशावित्येक-विꣳशो । भवतः प्रतिष्ठित्यै । प्रतिष्ठित्या अथौ । प्रतिष्ठित्या इति प्रति-स्थित्यै । अथो रुचँ । अथो इत्यथौ । रुचमेव । एवात्मन् । आत्मन्दधते । दधते बहवः । बहवष्पोडशिनः । पोडशिनो भवन्ति । भवन्ति तस्मात् । तस्माद्बहवः । बहवः प्रजासु । प्रजासु वृषाणः । प्रजास्विति प्र-जासु । वृषाणो यत् । यदेते । एते स्तोमाः । स्तोमा व्यतिषक्ताः । व्यतिषक्ता भवन्ति । व्यतिषक्ता इति वि-अतिषक्ताः । भवन्ति तस्मात् । तस्मादियं । इयमोषधीभिः । ओषधीभिर्वनस्पतिभिः । ओषधीभिरित्योषधि-भिः । वनस्पतिभि-र्व्यतिषक्ता । वनस्पतिभिरिति वनस्पति-भिः । व्यतिषक्ताव्यतिषज्यन्ते । व्यतिषक्तेति वि-अतिषक्ता ()

काण्ड -7, प्रपाठक -4, अनुवाक -3, अनुवाक सूक्तम -6,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। व्यतिषज्यन्ते प्रजया । व्यतिषज्यन्त इति वि-अतिषज्यन्ते । प्रजया पशुभिः । प्रजयेति प्र-जया । पशुभिर्ये । पशुभिरिति पशु-भिः । य एवम् । एवं विद्वाꣳसः । विद्वाꣳस एताः । एता आसते । आसतेऽक्ष्नाः । अक्ष्ना वै । वा एते । एते सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकं यन्ति । यन्त्युद्यावचान् । उच्छावचान् हि । हि स्तोमान् । स्तोमानुपयन्ति । उपयन्ति यत् । उपयन्तीत्युप-यन्ति । यदेते । एत ऊर्ध्वाः । ऊर्ध्वाः क्ष्नाः । क्ष्?नाः स्तोमाः । स्तोमा भवन्ति । भवन्ति क्ष्नाः । क्ष्ना एव । एव सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकं यन्ति । यन्त्युभयौ । उभयोरेभ्यः । एभ्यो लोकयोः । लोकयोः कल्पते । कल्पते त्रिꣳशत् । त्रिꣳशदेताः । एतास्त्रिꣳशदक्षरा । त्रिꣳशदक्षरा विराट् । त्रिꣳशदक्षरेति त्रिꣳशत्-अक्षरा । विराडन्नँ । विराडिति वि-राट् । अन्नं विराट् । विराड्विराजा । विराडिति वि-राट् । विराजेव । विराजेति वि-राजा । एवान्नाद्यँ । अन्नाद्यमवं । अन्नाद्यमित्यन्न-अद्यँ । अवं रुन्धते । रुन्धतेऽति रात्रौ । अतिरात्रावभितः । अतिरात्रावित्यति-रात्रौ । अभितो भवतः । भवतोऽन्नाद्यस्य । अन्नाद्यस्य परिंगृहीत्यै । अन्नाद्यस्येत्यन्न अद्यस्य । परिंगृहीत्या इति परिं-गृहीत्यै () ॥॥

काण्ड -7, प्रपाठक -4, अनुवाक -4, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

प्रजापतिस्सुवर्गं । प्रजापतिरितिं प्रजा-पतिः । सुवर्गं लोकं । सुवर्गमितिं सुवः-गम् । लोकमैत् । ऐत्तं । तं देवाः । देवा येनयेन । येनयेन छन्दसा । येनयेनेति येन-येन । छन्दसाऽनु । अनु प्र । प्रायुंजत । अयुंजत तेनं । तेन न । नाप्नुवन्न् । आप्नुवन्ते । त एताः । एता द्वात्रिंश्शतं । द्वात्रिंश्शत्श रात्रीः । रात्रीरपश्यन्न् । अपश्यन्द्वात्रिंश्शदक्षरा । द्वात्रिंश्शदक्षरानुष्टुक् । द्वात्रिंश्शदक्षरेति द्वात्रिंश्शत्-अक्षरा । अनुष्टुगानुंष्टुभः । अनुष्टुगित्यनु-स्तुक् । आनुंष्टुभः प्रजापतिः । आनुंष्टुभ इत्यानुं-स्तुभः । प्रजापतिस्स्वेनं । प्रजापतिरितिं प्रजा-पतिः । स्वेनेव । एव छन्दसा । छन्दसा प्रजापतिं । प्रजापतिमात्मा । प्रजापतिमितिं प्रजा-पतिं । आत्माऽभ्यारुह्यं । अभ्यारुह्यं सुवर्गं । अभ्यारुह्येत्यभि-आरुह्यं । सुवर्गं लोकं । सुवर्गमितिं सुवः-गम् । लोकमायन्न् । आयन्, ये । य एवं । एवं विद्वाश्सः । विद्वाश्स एताः । एता आसते । आसते द्वात्रिंश्शत् । द्वात्रिंश्शदेताः । एता द्वात्रिंश्शदक्षरा । द्वात्रिंश्शदक्षराऽनुष्टुक् । द्वात्रिंश्शदक्षरेति द्वात्रिंश्शत्-अक्षरा । अनुष्टुगानुंष्टुभः । अनुष्टुगित्यनु-स्तुक् । आनुंष्टुभः प्रजापतिः । आनुंष्टुभ इत्यानुं-स्तुभः । प्रजापतिस्स्वेनं । प्रजापतिरितिं प्रजा-पतिः । स्वेनेव । एव छन्दसा । छन्दसा प्रजापतिं । प्रजापति-मात्मा । प्रजापतिमितिं प्रजा-पतिं । आत्मा श्रियँ । श्रियं गच्छन्ति ॥ गच्छन्ति श्रीः ()

काण्ड -7, प्रपाठक -4, अनुवाक -4, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। श्रीर् हि । हि मनुष्यस्य । मनुष्यस्य सुवर्गः । सुवर्गो लोकः । सुवर्ग इतिं सुवः-गः । लोको द्वात्रिंश्शत् । द्वात्रिंश्शदेताः । एता-द्वात्रिंश्शदक्षरा । द्वात्रिंश्शदक्षराऽनुष्टुक् । द्वात्रिंश्शदक्षरेति द्वात्रिंश्शत्-अक्षरा । अनुष्टुग्वाक् । अनुष्टुगित्यनु-स्तुक् । वागनुष्टुप् । अनुष्टुफ्सवाँ । अनुष्टुबित्यनु-स्तुप् । सर्वामेव । एव वाचँ । वाचमाप्नुवन्ति । आप्नुवन्ति सर्वे । सर्वे वाचः । वाचो वदितारः । वदितारो भवन्ति । भवन्ति सर्वे । सर्वे हि । हि श्रियँ । श्रियं गच्छन्ति । गच्छन्ति ज्योतिः । ज्योति र्गौः । गौरायुः । आयुरितिं । इतिं त्र्यहाः । त्र्यहा भवन्ति । त्र्यहा इतिं त्रि-अहाः । भवन्तीयं

। इ॒यं वाव । वाव ज्योतिः॑ । ज्योति॑र॒न्तरि॑क्षं । अ॒न्तरि॑क्षं गौः । गौर॒सौ । अ॒सावायुः॑ । आयु॒रि॒मान् । इ॒मा॒नेव । एव लो॒कान् । लो॒कान॒भ्यारो॑हन्ति । अ॒भ्यारो॑ह-न्त्यभिपू॒र्वं । अ॒भ्यारो॑ह॒न्तीत्य॑भि-आरो॑हन्ति । अ॒भि॒पू॒र्वं व्र॒हाः । अ॒भि॒पू॒र्व-मित्य॑भि-पू॒र्वम् । व्र॒हा भ॑वन्ति । व्र॒हा इति॑ त्रि-अ॒हाः । भ॒व॒न्त्य॒भि॒पू॒र्वं । अ॒भि॒पू॒र्वमेव । अ॒भि॒पू॒र्वमित्य॑भि-पू॒र्वं । एव सु॑व॒र्गं । सु॒व॒र्गं लो॒कं । सु॒व॒र्गमिति॑ सुवः-गम् । लो॒कम॒भ्यारो॑हन्ति । अ॒भ्यारो॑हन्ति बृहद्रथन्त॒-राभ्या॑म् । अ॒भ्यारो॑ह॒न्त्य॑भि-आरो॑हन्ति । बृ॒ह॒द्र॒थ॒न्त॒राभ्या॑म् यन्ति । बृ॒ह॒द॒थ॒न्त॒-राभ्या॒मिति॑ बृहत्-र॒थ॒न्त॒राभ्या॑म् । य॒न्तीयं ()

काण्ड -7, प्रपाठक -4, अनुवाक -4, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। इ॒यं वाव । वाव र॑थन्त॒रं । र॒थ॒न्त॒रम॒सौ । र॒थ॒न्त॒रमिति॑ रथं-त॒रं । अ॒सौ बृ॒हत् । बृ॒हदा॒भ्याम् । आ॒भ्यामेव । एव य॑न्ति । य॒न्त्यथौ॑ । अथो॑ अ॒नयोः॑ । अथो॒ इत्यथौ॑ । अ॒नयो॒रेव । एव प्रति॑ । प्रति॑ तिष्ठन्ति । ति॒ष्ठ॒न्त्येते । ए॒ते वै । ए॒ते इ॒त्ये॒ते । वै य॒ज्ञस्य॑ । य॒ज्ञस्या॑ऽजसाऽयनी । अ॑ज॒सायऽय॑नी सु॒ती । अ॑ज॒सायन॑ी इ॒त्य॑जसा-अय॑नी । सु॒ती ताभ्या॑म् । सु॒ती इति॑ सु॒ती । ताभ्या॑मेव । एव सु॑व॒र्गं । सु॒व॒र्गं लो॒कं । सु॒व॒र्गमिति॑ सुवः-गम् । लो॒कं य॑न्ति । य॒न्ति परा॑ञ्चः । परा॑ञ्चो॒ वै । वा ए॒ते । ए॒ते सु॑व॒र्गं । सु॒व॒र्गं लो॒कं । सु॒व॒र्ग-मिति॑ सुवः-गं । लो॒कम॒भ्यारो॑हन्ति । अ॒भ्यारो॑हन्ति ये । अ॒भ्यारो॑ह॒न्त्य॑भि-आरो॑हन्ति । ये परा॑ञ्चः । परा॑ञ्चस्व्र॒हान् । व्र॒हान॒नु॑प यन्ति॑ । व्र॒हानिति॑ त्रि-अ॒हान् । उ॒प॒यन्ति॑ प्र॒त्यङ् । उ॒प॒यन्त्यित्यु॑प-यन्ति॑ । प्र॒त्यङ्व्र॒हः । व्र॒हो भ॑वति । व्र॒ह इति॑ त्रि-अ॒हः । भ॒व॒ति॒ प्र॒त्यव॑रूढ्यै । प्र॒त्यव॑रूढ्या अथौ॑ । प्र॒त्यव॑-रूढ्या इति॑ प्रति-अव॑रूढ्यै । अथो॑ प्रति॑ष्ठित्यै । अथो॒ इत्यथौ॑ । प्रति॑ष्ठित्या उ॒भयो॑ः । प्रति॑ष्ठित्या इति॒ प्रति॑-स्थित्यै । उ॒भयौ॑र्लो॒कयो॑ः । लो॒कयो॒र् ऋद्धा । ऋद्धो॑त् । उत्ति॑ष्ठन्ति । ति॒ष्ठ॒न्ति॒ द्वात्रि॑ꣳशत् । द्वात्रि॑ꣳशदे॒ताः । ए॒तास्तासा॑म् । तासा॑म् याः । यास्त्रि॑ꣳशत् । त्रि॑ꣳशत्त्रि॑ꣳशद॑क्षरा । त्रि॑ꣳशद॑क्षरा वि॒राट् । त्रि॑ꣳशद॑क्षरेति॑ त्रि॑ꣳशत्-अ॒क्ष॒रा । वि॒राडन्न॑म् । वि॒राडिति॑ वि-राट् । अन्न॑म् वि॒राट् । वि॒राड्वि॒राजा॑ । वि॒राडिति॑ वि-राट् । वि॒राज॒ेव । वि॒राजे॒ति॑ वि-राजा॑ । एवान्नाद्य॑म् । अ॒न्नाद्य॑मव॑ । अ॒न्नाद्य॒मित्य॑न्न-अद्य॑म् । अव॑ रुन्धते । रु॒न्ध॒ते ये । ये द्वे । ये इति॒ ये । द्वे अ॑होरा॒त्रे । द्वे इति॒ द्वे । अ॒हो॒रा॒त्रे एव ।

अहो-रात्रे इत्यहः-रात्रे । एव ते । ते उभाभ्याँ । ते इति ते । उभाभ्यांꣳ रूपाभ्याँ । रूपाभ्यांꣳ सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः- गम् । लोकं यन्ति । यन्त्यतिरात्रौ । अतिरात्रावर्बितः । अतिरात्रावित्यति-रात्रौ । अभितो भवतः । भवतः परिगृहीत्यै । परिगृहीत्या इति परि-गृहीत्यै () ॥॥

काण्ड -7, प्रपाठक -4, अनुवाक -5, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

द्वे वाव । द्वे इति द्वे । वाव दैवसत्रे । दैवसत्रे द्वादशाहः । दैवसत्रे इति देव-सत्रे । द्वादशाहश्च । द्वादशाह इति द्वादश-अहः । चैव । एव त्रयस्त्रिꣳशदहः । त्रयस्त्रिꣳशदहश्च । त्रयस्त्रिꣳशदह इति त्रयस्त्रिꣳशत्- अहः । च ये । य एवं । एवं विद्वाꣳसः । विद्वाꣳस स्त्रयस्त्रिꣳशदहं । त्रयस्त्रिꣳशदहमासते । त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत्-अहम् । आसते साक्षात् । साक्षादेव । साक्षादिति स-अक्षात् । एव देवताः । देवता अभ्यारोन्-हन्ति । अभ्यारोहन्ति यथाँ । अभ्यारोहन्तीत्यभि-आरोहन्ति । यथा खलु । खलु वै । वै श्रेयान् । श्रेयानभ्या रूढः । अभ्यारूढः कामयते । अभ्यारूढ इत्यभि-आरूढः । कामयते तथाँ । तथा करोति । करोति यदि । यदव विध्यति । अव विध्यति पापीयान् । अवविध्यतीत्यव-विध्यति । पापीयान्भवति । भवति यदि । यदि न । नावविध्यति । अवविध्यति सदृङ् । अवविध्यतीत्यवि-ध्यति । सदृङ्मे । सदृङ्मिति स-दृङ् । य एवम् । एवं विद्वाꣳसः । विद्वाꣳसस्त्रयस्त्रिꣳश-दहम् । त्रयस्त्रिꣳशदह मासते । त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत्- अहम् । आसते वि । वि पाप्मनाँ । पाप्मना भ्रातृव्येण । भ्रातृव्येणा । आ वर्तन्ते । वर्तन्तेऽहर्भाजं । अहर्भाजो वै । अहर्भाज इत्यहः-भाजः । वा एताः । एता देवाः । देवा अग्रैँ । अग्र आ । आऽहरन् । अहरन्नहः ()

काण्ड -7, प्रपाठक -4, अनुवाक -5, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। अहरेकः । एकोऽ भजत । अभजताहः । आहरेकः । एकस्ताभिः । ताभिर्वै । वै ते । ते प्रबाहुक् ।

प्रबाहुगार्ध्नुवन्न् । प्रबाहुगिति प्र-बाहुक् । आर्ध्नुवन्, ये । य एवं । एवं विद्वाꣳसः । विद्वाꣳसस्त्रयस्त्रिꣳशदहम् ।

त्रयस्त्रिꣳशदहमासते । त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत्-अहम् । आसते सर्वे । सर्व एव । एव प्रबाहुक् ।

प्रबाहुगृध्नुवन्ति । प्रबाहुगिति प्र-बाहुक् । ऋध्नुवन्ति सर्वे । सर्वे ग्रामणीयं । ग्रामणीयं प्र । ग्रामणीयमिति ग्राम-नीयम् ।

प्राप्नुवन्ति । आप्नुवन्ति पंचाहाः । पंचाहा भवन्ति । पंचाहा इति पंच-अहाः । भवन्ति पंच । पंच वै । वा ऋतवः ।

ऋतवस्संवथ्सरः । संवथ्सर ऋतुषु । संवथ्सर इति सं-वथ्सरः । ऋतुष्वेव । एव संवथ्सरे । संवथ्सरे प्रति । संवथ्सर

इति सं-वथ्सरे । प्रति तिष्ठन्ति । तिष्ठन्त्यथौ । अथो पंचाक्षरा । अथो इत्यथौ । पंचाक्षरा पंक्तिः । पंचाक्षरेति पंच-

अक्षरा । पंक्तिः पांक्तः । पांक्तो यज्ञः । यज्ञो यज्ञम् । यज्ञमेव । एवाव । अव रुन्धते । रुन्धते त्रीणि । त्रीण्याश्विनानि

। आश्विनानि भवन्ति । भवन्ति त्रयः । त्रय इमे । इमे लोकाः । लोका एषु ॥ एष्वेव । एव लोकेषु ()

काण्ड -7, प्रपाठक -4, अनुवाक -5, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। लोकेषु प्रति । प्रति तिष्ठन्ति । तिष्ठन्त्यथौ । अथो त्रीणि । अथो इत्यथौ । त्रीणि वै । वै यज्ञस्य । यज्ञस्येन्द्रियाणि

। इन्द्रियाणितानि । तान्येव । एवाव । अव रुन्धते । रुन्धते विश्वजित् । विश्वजिद्भवति । विश्वजिदिति विश्व-जित् ।

भवत्यन्नाद्यस्य । अन्नाद्यस्यावरुद्ध्यै । अन्नाद्यस्येत्यन्न-अद्यस्य । अवरुद्ध्यै सर्वपृष्ठः । अवरुध्या इत्यव-रुद्ध्यै । सर्वपृष्ठो

भवति । सर्वपृष्ठ इति सर्व-पृष्ठः । भवति सर्वस्य । सर्वस्याभिजित्यै । अभिजित्यै वाक् । अभिजित्या इत्यभि-जित्यै ।

वाग्वै । वै द्वादशाहः । द्वादशाहो यत् । द्वादशाह इति द्वादश-अहः । यत्पुरस्तात् । पुरस्ताद्द्वादशाहं । द्वादशाहमुपेयुः ।

द्वादशाहमिति द्वादश-अहम् । उपेयुरनाप्ताम् । उपेयुरित्युप-इयुः । अनाप्तां वाचं । वाचमुप । उपेयुः । इयुरुपदासुका

। उपदासुकेषां । उपदासुकेत्युप-दासुका । एषां वाक् । वाख्स्यात् । स्यादुपरिष्टात् । उपरिष्टाद्द्वादशाहं । द्वादशाह-मुप

। द्वादशाहमिति द्वादश-अहम् । उपयन्ति । यन्त्याप्ताम् । आप्तामेव । एव वाचँ । वाचमुप । उप यन्ति । यन्ति तस्मात् । तस्मादुपरिष्टात् । उपरिष्टाद्वाचा । वाचावदामः । वदामोऽवान्तरम् । अवान्तरं वै । अवान्तरमित्यव-अन्तरम् ()

काण्ड -7, प्रपाठक -4, अनुवाक -5, अनुवाक सूक्तम -4,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। वै दशरात्रेण । दशरात्रेण प्रजापतिः । दशरात्रेणेति दश-रात्रेण । प्रजापतिः प्रजाः । प्रजापतिरिति प्रजा-पतिः । प्रजा असृजत । प्रजा इति प्र-जाः । असृजत यत् । यद्दशरात्रः । दशरात्रो भवति । दशरात्र इति दश-रात्रः । भवति प्रजाः । प्रजा एव । प्रजा इति प्र-जाः । एव तत् । तद्यजमानाः । यजमानास्सृजन्ते । सृजन्त एताम् । एताꣳ ह । ह वै । वा उदङ्कः । उदङ्कश्चौल्लायनः । शौल्लायनस्सत्रस्य । सत्रस्यर्धौ । ऋद्धिमुवाच । उवाच यत् । यद्दशरात्रः । दशरात्रो यत् । दशरात्र इति दश-रात्रः । यद्दशरात्रः । दशरात्रो भवति । दशरात्र इति दश-रात्रः । भवति सत्रस्य । सत्रस्यर्द्धै । ऋद्ध्या अथौ । अथो यत् । अथो इत्यथौ । य देव । एव पूर्वेषु । पूर्वेष्वहस्सु । अहस्सु विलोम । अहस्स्वित्यहः-सु । विलोम क्रियतै । विलोमेति वि-लोम । क्रियते तस्य । तस्यैव । एवैषा । एषा शान्तिः । शान्तिर्ब्वनीकाः । ब्वनीका वै । ब्वनीका इति द्वि-अनीकाः । वा एताः । एता रात्रयः । रात्रयो यजमानाः । यजमाना विश्वजित् । विश्वजिथ्सह । विश्वजिदिति विश्व-जित् । सहातिरात्रेण । अतिरात्रेण पूर्वाः । अतिरात्रेणेत्यति-रात्रेण । पूर्वाष्षोडश । षोडश सह । सहाति रात्रेण । अतिरात्रेणोत्तराः । अतिरात्रेणेत्यति-रात्रेण । उत्तराष्षोडश । उत्तरा इत्युत्-तराः । षोडश ये । य एवम् । एवं विद्वाꣳसः । विद्वाꣳसस्त्रयस्त्रिꣳशदहं । त्रय-स्त्रिꣳशदहमासते । त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत्-अहम् । आसत आ । ऐषाँ । एषां ब्वनीका । ब्वनीका प्रजाः । ब्वनीकेति द्वि-अनीका । प्रजा जायते । प्रजेति प्र-जाः । जायतेऽतिरात्रौ । अतिरात्रावभितः । अतिरात्रावित्यति-रात्रौ । अभितो भवतः । भवतः परिगृहीत्ये । परिगृहीत्या इति परि- गृहीत्ये () ॥॥

काण्ड -7, प्रपाठक -4, अनुवाक -6, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

आदित्या अकामयन्त । अकामयन्त सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकमियाम । इयामेति । इति ते । ते सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकं न । न प्र । प्राजानन्न् । अजानन्न । न सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकमायन्न् । आयन्ते । त एतं । एतꣳषड्विꣳशद्रात्रं । षड्विꣳशद्रात्रमपश्यन्न् । षड्विꣳशद्रात्रमिति षड्विꣳशत्-रात्रम् । अपश्यन्तं । तमा । आहरन्न् । अहरन्तेनं । तेना यजन्त । अयजन्त ततः । ततो वै । वै ते । ते सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकं प्र । प्राजानन्न् । अजानन्थ्सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकमायन्न् । आयन्, ये । य एवं । एवं विद्वाꣳसः । विद्वाꣳसष्षड्विꣳशद्रात्रं । षड्विꣳशद्रात्रमासते । षड्विꣳशद्रात्रमिति षड्विꣳशत्-रात्रं । आसते सुवर्गं । सुवर्गमेव । सुवर्गमिति सुवः-गम् । एव लोकम् । लोकम् प्र । प्रजानन्ति । जानन्ति सुवर्गं । सुवर्गं लोकं । सुवर्गमिति सुवः-गम् । लोकं यन्ति । यन्ति ज्योतिः । ज्योतिरतिरात्रः । अतिरात्रो भवति । अतिरात्र इत्यति-रात्रः ()

काण्ड -7, प्रपाठक -4, अनुवाक -6, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। भवति ज्योतिः । ज्योतिरेव । एव पुरस्ताँत् । पुरस्ताँ- द्दधते । दधते सुवर्गस्य । सुवर्गस्य लोकस्य । सुवर्गस्येति सुवः-गस्य । लोकस्यानुख्यात्ये । अनुख्यात्ये षडहाः । अनुख्यात्या इत्यनु-ख्यात्ये । षडहा भवन्ति । षडहा इति षट्-अहाः । भवन्ति षट् । षड्वै । वा ऋतवः । ऋतव ऋतुषु । ऋतुष्वेव । एव प्रति । प्रति तिष्ठन्ति । तिष्ठन्ति चत्वारः । चत्वारो भवन्ति । भवन्ति चतस्रः । चतस्रो दिशः । दिशो दिक्षु । दिक्ष्वेव । एव प्रति । प्रति तिष्ठन्ति । तिष्ठन्त्यसत्रं । असत्रं वै । वा एतत् । एतद्यत् । यदछन्दोमम् । अछन्दोमं यत् । अछन्दोममित्य छन्दः-मम् । यच्छन्दोमाः । छन्दोमा भवन्ति । छन्दोमा इति छन्दः-माः । भवन्ति तेन । तेन सत्रं । सत्रं देवताँः । देवता एव । एव पृष्ठैः । पृष्ठैरव

। अवं रुन्धते । रुन्धते पशून् । पशू- न्छंन्दोभिः । छन्दोभिरोजः । छन्दोभिरितिं छन्दः-भिः । ओजो वै । वै वीर्यं । वीर्यं पृष्ठानिं । पृष्ठानिं पशवः । पशवश्छन्दोमाः । छन्दोमा ओजंसि । छन्दोमा इतिं छन्दः-माः । ओजंस्येव । एव वीर्यं ()

काण्ड -7, प्रपाठक -4, अनुवाक -6, अनुवाक सूक्तम -3,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

। वीर्यं पशुषुं । पशुषु प्रतिं । प्रतिं तिष्ठन्ति । तिष्ठन्ति षट्त्रिꣳशद्रात्रयः । षट्त्रिꣳशद्रात्रयो भवंति । षट्त्रिꣳशद्रात्र इतिं षट्त्रिꣳशत्-रात्रः । भवति षट्त्रिꣳशदक्षरा । षट्त्रिꣳशदक्षरा बृहती । षट्त्रिꣳशदक्षरेति षट्त्रिꣳशत्-अक्षरा । बृहती बार्हताः । बार्हताः पशवः । पशवो बृहत्या । बृहत्येव । एव पशून् । पशूनवं । अवं रुन्धते । रुन्धते बृहती । बृहती छन्दंसाम् । छन्दंसाꣳ स्वाराँज्यं । स्वाराँज्यमाश्नुते । स्वाराँज्यमिति स्व-राज्यम् । आश्नुताश्नुवतैं । अश्नुवते स्वाराँज्यं । स्वाराँज्यं ये । स्वाराँज्यमिति स्व-राज्यम् । य एवं । एवं विद्वाꣳसः । विद्वाꣳसः षट्त्रिꣳशद्रात्रं । षट्त्रिꣳशद्रात्रमासंते । षट्त्रिꣳशद्रात्रमितिं षट्त्रिꣳशत्-रात्रम् । आसंते सुवर्गं । सुवर्गमेव । सुवर्गमितिं सुवः-गम् । एव लोकम् । लोकम् यंन्ति । यन्त्यतिरात्रौ । अतिरात्रावभितः । अतिरात्रावित्यति-रात्रौ । अभितो भवतः । भवतस्सुवर्गस्यं । सुवर्गस्यं लोकस्यं । सुवर्गस्येतिं सुवः-गस्यं । लोकस्य परिंगृहीत्यै । परिंगृहीत्या इति परिं-गृहीत्यै () ॥॥

काण्ड -7, प्रपाठक -4, अनुवाक -7, अनुवाक सूक्तम -1,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

वसिंष्ठो हतपुंत्रः । हतपुंत्रोऽकामयत । हतपुंत्र इतिं हत-पुत्रः । अकामयत विन्देयं । विन्देयं प्रजां । प्रजामभि । प्रजामितिं प्र-जाम् । अभिसौंदासान् । सौदासान्भवेयं । भवेयमितिं । इति सः । स एतम् । एतमेंकस्मान्नपंचाशम् । एकस्मान्नपंचाशमंपश्यत् । एकस्मान्नपंचाशमित्येंक-स्मात्-नपंचाशम् । अपश्यत्तं । तमा । आऽहंरत् । अहरत्तेनं । तेनायजत । अयजत ततः । ततो वै । वै सः । सोऽविंन्दत । अविन्दत प्रजां । प्रजामभि । प्रजामितिं प्र-जाम् ।

अभिसौदासान् । सौदासानं भवत् । अभवदो । य एवं । एवं विद्वाꣳसः । विद्वाꣳसं एकस्मान्नपंचाशम् । एकस्मान्नपंचाशमासते । एकस्मान्नपंचाशमित्येकस्मात्-नपंचाशम् । आसते विन्दन्तै । विन्दन्तै प्रजां । प्रजामभि । प्रजामिति प्र-जाम् । अभि भ्रातृव्यान् । भ्रातृव्यान्भवन्ति । भवन्ति त्रयः । त्रयस्त्रिवृतः । त्रिवृतौऽग्निष्टोमाः । त्रिवृत इति त्रि-वृतः । अग्निष्टोमा भवन्ति । अग्निष्टोमा इत्यग्नि-स्तोमाः । भवन्ति वज्रस्य । वज्रस्यैव । एव मुखं । मुखꣳ सं । सꣳ श्यन्ति । श्यन्ति दश । दश पंचदशाः । पंचदशा भवन्ति । पंचदशा इति पंच-दशाः । भवन्ति पंचदशः । पंचदशो वज्रः । पंचदश इति पंच-दशः । वज्रो वज्रं ()

काण्ड -7, प्रपाठक -4, अनुवाक -7, अनुवाक सूक्तम -2,

वैश्वदेव-काण्डम् -विषयः -सात्रायण-ब्राह्मणम्,

